# Yamaproktam Shivanamamahimopadesham

# યમપ્રોક્તં શિવનામમહિમોપદેશમ્

## Document Information

Text title : Yamaproktam Shivanamamahimopadesham

File name : yamaproktaMshivanAmamahimopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 269-295||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# યમપ્રોક્તં શિવનામમહિમોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

(ચિત્રગુપ્ત યમ સંવાદે)

યમ ઉવાચ

યસ્મિન્નનુગ્રહઃ શમ્ભોસ્તેનૈવ મરણક્ષણે ।
શિવેત્યુદીર્યતે શબ્દઃ સાક્ષાન્મોક્ષપ્રદાયકઃ ॥ ૨૬૯॥

યેનૈવોદીર્યતે શબ્દઃ શિવશબ્દો મૃતિક્ષણે ।
તેનૈવ પ્રાપ્યતે મોક્ષઃ સ યતો મોક્ષદાયકઃ ॥ ૨૭૦॥

શિવશબ્દં સમુચ્ચાર્ય બ્રહ્મહાપિ વિમુચ્યતે ।
સર્વાણિ શિવનામાનિ મોક્ષદાન્યેવ સર્વથા ॥ ૨૭૧॥

તેષ્વપ્યત્યુત્તમં નામ શિવેતિ બ્રહ્મસંજ્ઞિતમ્ ।
અઘોરતરસંસારસાગરાપ્લુતમપ્લુતમ્ ॥ ૨૭૨॥

ઉદ્ધરત્યન્તકાલોક્તં શિવનામ શિવાત્મકમ્ ।
શિવનામસમં વસ્તુ ન દૃષ્ટં ક્વાપિ ન શ્રુતમ્ ॥ ૨૭૩॥

રત્નરત્નમિદં નૂનં નામરત્નમનુત્તમમ્ ।
નિત્યં કણ્ઠે ધૃતો યેન શિવનામમહામણિઃ ॥ ૨૭૪॥

સ નીલકણ્ઠો ભૂત્વાન્તે નીલકણ્ઠે વિલીયતે ।
બ્રહ્મપ્રકાશકં સાક્ષાચ્છિવ ઇત્યક્ષરદ્વયમ્ ॥ ૨૭૫॥

ન તસ્માદધિકં ક્વાપિ નામ બ્રહ્મપ્રકાશકમ્ ।
પ્રતિક્ષણં શિવેત્યેવ નામ યો વક્તુમિચ્છતિ ॥ ૨૭૬॥

તસ્મૈ નમો નમો ભૂયો નમસ્તસ્મૈ નમો નમઃ ।
યઃ શ ૃણોતિ શિવેત્યેવ નામ ભક્તિપુરઃસરમ્ ॥ ૨૭૭॥

તસ્મૈ નમો નમો ભૂયો નમસ્તસ્મૈ નમો નમઃ ।

શિવેતિ નામ શ્રુત્વૈવ યો હૃષ્ટહૃદયો ભવેત્ ॥ ૨૭૮॥

તસ્મૈ નમો નમો ભૂયો નમસ્તસ્મૈ નમો નમઃ ।
શિવેતિ નામપીયૂષં યઃ પિબત્યન્વહં મુદા ॥ ૨૭૯॥

તસ્મૈ નમો નમો ભૂયો નમસ્તસ્મૈ નમો નમઃ ।
શિવનામ્નૈવ સતતં વ્યવહારં કરોતિ યઃ ॥ ૨૮૦॥

તસ્મૈ નમો નમો ભૂયો નમસ્તસ્મૈ નમો નમઃ ।
મહાપ્રલયકાલાગ્નિર્યથા દહતિ પર્વતાન્ ॥ ૨૮૧॥

તથા દહતિ પાપાદ્રીન્ શિવનામાનલો ધ્રુવમ્ ।
શિવનામવિનાશ્યાનિ પાતકાન્યમિતાન્યતઃ ॥ ૨૮૨॥

મહાઘનાશકં નામ નમિતાઘૌઘનાશકમ્ ।
અનન્તાન્યપિ પાપાનિ શિવનામ્નિ સ્મૃતે પરમ્ ॥ ૨૮૩॥

સદ્યો વિનાશયત્યેવ વિચિત્રાણ્યપિ સત્વરમ્ ।
અન્તકાલે શિવેત્યુક્ત્વા યસ્તુપ્રાણાન્વિમુઞ્ચતિ ॥ ૨૮૪॥

સ સર્વથાત્ર નાનેયઃ સ યતઃ શાઙ્કરો જનઃ ।
શાઙ્કરા નૈવ પશ્યન્તિ દુષ્ટં મમ નિકેતનમ્ ॥ ૨૮૫॥

અત એવાત્ર નાનેયાઃ શાઙ્કરાઃ શઙ્કરપ્રિયાઃ ।
યસ્યાઙ્ગે શાઙ્કરં ચિહ્નં સ નાનેયોઽત્ર સર્વથા ॥ ૨૮૬॥

યતઃ સ શઙ્કરાઙ્કાઙ્કઃ શાઙ્કરઃ શઙ્કરપ્રિયઃ ।
શઙ્કરાઙ્કાનિ વક્ષ્યન્તે તાનિ શૃણ્વન્તુ સાદરમ્ ॥ ૨૮૭॥

યદઙ્કશ્રવણેનાપિ પાપનાશો ભવિષ્યતિ ।
રુદ્રાક્ષધારણં શુદ્ધં કેવલં ભસ્મધારણમ્ ॥ ૨૮૮॥

કેવલા શિવપૂજા ચ શઙ્કરાઙ્કમિતિ શ્રુતિઃ ।
શિવનામાનુસન્ધાનં રુદ્રાધ્યાયાનુવર્તનમ્ ॥ ૨૮૯॥

ઉદ્ધૂલનં ચ સર્વાઙ્ગે શઙ્કરાઙ્કમિતિ શ્રુતિઃ ।
સોમવારવ્રતે શ્રદ્ધા તથા શિવકથાશ્રુતૌ ॥ ૨૯૦॥

શિવભક્તજનપ્રીતિઃ શઙ્કરાઙ્કમિતિ શ્રુતિઃ ।
ઇમાનિ કેવલાન્યેવ શિવાઙ્કાનિ તથા શ્રુતિઃ ॥ ૨૯૧॥

ઇમાન્યઙ્કાનિ યસ્યાઙ્ગે કેવલાનિ સ શાઙ્કરઃ ।
એતાદૃશાઃ શાઙ્કરાસ્તુ નાયાન્તિ મમ મન્દિરમ્ ॥ ૨૯૨॥

શાઙ્કરાઃ શઙ્કરાઙ્કાઙ્કા નિરાતઙ્કા નિરઙ્કુશાઃ ।
ભુવિ વિન્યસ્તપર્યઙ્કાઃ પ્રયાન્ત્યેવ હિ શઙ્કરમ્ ॥ ૨૯૩॥

અદ્ય પ્રભૃતિ નાનેયઃ શાઙ્કરોઽત્ર કદાચન ।
યદ્યત્રાનીયતે મોહાત્ યુષ્માન્હિંસ્યામ્યહં તદા ॥ ૨૯૪॥

શિક્ષૈવમેવ ક્રિયતે પ્રત્યહં સાદરં મયા ।
તથાપિ ભવતાં બુદ્ધિરન્યથૈવ હિ જાયતે ॥ ૨૯૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમપ્રોક્તં શિવનામમહિમોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩। ૨૬૯-૨૯૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 269-295..

Notes:
Yama યમ delivers Upadeśa ઉપદેશ to Citragupta ચિત્રગુપ્ત about the merits of listening to and recitation of ŚivaNāma શિવનામ, especially at the time of one's death. He mentions that while all of the ŚivaNāma શિવનામ can bestow Liberation, the DvyakṣaraNāma Śiva દ્વ્યક્ષરનામ શિવ that is Parama Brahma પરમ બ્રહ્મ itself, is the most essential one.
Yama યમ also instructs that the Śāṅkarā-s શાઙ્કરાઃ who are adorned with i.e. Śaṅkarāṅka શઙ્કરાઙ્ક should not be brought to his (Yama's) abode.

Proofread by Ruma Dewan

*Yamaproktam Shivanamamahimopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*